International Journal of Sanskrit Research 2021; 7(1): 519-520

International Journal of Sanskrit Research

अनन्ता

ISSN: 2394-7519
IJSR 2021; 7(1): 519-520
© 2021 IJSR
www.anantaajournal.com
Received: 18-11-2020
Accepted: 22-12-2020

डॉ0 संतोष कुमार पाठक
बेलाशंकर, वार्ड नं.– 3, निकट– पी. टी.सी., लालबाग, दरभंगा, बहार, भारत

Corresponding Author:
डॉ0 संतोष कुमार पाठक
बेलाशंकर, वार्ड नं.– 3, निकट– पी. टी.सी., लालबाग, दरभंगा, बहार, भारत

# ज्योतिषस्य होराशास्त्रे ग्रहाणां दृष्टिविचारः

**डॉ0 संतोष कुमार पाठक**

**सारांशः**
ग्रहाणां दृष्टिरेव तेषां शक्तिरूपेण व्यभिचरितं भवति। व्ययभावगत यत्दृष्टिफलं तद्दुपस्थाप्यते – व्ययस्थानगतो राहुभौमार्कविसंयुतः। तदीशेऽप्यर्क–संयुक्ते नरके पतनं भवेत्।। यदि जातकस्य जन्मकुण्डल्यां द्वादशेभावे राहुभौमसूर्यैः सह व्ययेशोऽपि सूर्येण युक दृष्टिर्वा भवेत्तदा जातकः नरकं गच्छति।

**कूट शब्दः** ज्योतिषस्य, होराशास्त्रे, ग्रहाणां, जन्मकुण्डल्यां

## प्रस्तावना

व्ययस्थानगते सौम्ये तदीशे स्वोच्चराशिगे।
शुभयुक्ते शुभैर्दृष्टे मोक्षः स्यान्नत्र संशयः।।[1]

यदि द्वादशेभावे वुधः भवेत्, व्ययेश स्वकीयोच्चराशिस्थितः, शुभग्रहेण युतः दृष्टिश्च यदि भवेत्तदा मोक्षः भवति।।

व्ययेशे पापसंयुक्ते व्यये पापसमन्विते।
पापग्रहेण संदृष्टे देशात् देशान्तरं गतः।।[2]

व्ययेशः यदि पापग्रहेण युतः भवेत्, व्यय भावे पापग्रहाः भवेयुः, पापग्रहेणैव दृष्टः यदि भवेत्तदा देश विदेशे गमनोत्सुकः भवति।

व्ययेशे शुभराशिस्थे व्ययर्क्षे शुभसंयुते।
शुभग्रहेण सन्दृष्टे स्वदेशात्संचरो भवेत्।।[3]

यदि व्ययेशः शुभराशौ स्थितः भवेत, व्ययभावे शुभग्रहाः भवेयुः, शुभग्रहेण दृष्टश्च यदि भवेत्तदा अन्यदेशे जातकस्य गमनं भवति।।

व्यये मन्दादि संयुक्ते भूमिजेन समन्विते।
शुभदृष्टैश्च सम्प्राप्तिः पापमूलाद्धनार्जनम्।।[4]

व्ययभावः यदि शनि भौमाभ्यां युतः भवेत्, शुभग्रहैरदृष्टः यदि भवेत्तदा जातकः पापकर्मणा धनस्य हानिर्भवति।।

लग्नेशे व्ययराशिस्थे व्ययेशे लग्नसंयुते।
भृगुपुत्रेण संयुक्ते धर्ममूलाद्धनव्ययम्।।[5]

यदि लग्नेश द्वादशस्थः भवेत्, व्ययेशः लग्नस्थः भवेत्, शुक्रेण युतो दृष्टो वा धर्मकर्मणा धनव्ययः भवति। अथकारकांशवशाद् व्ययभावफलं कथितं महर्षिपराशरेण

यथा – कारकांशाद् व्ययस्थाने उच्चस्थे च शुभग्रहे।
सद्गतिर्जायते तस्य शुभलोकमवाप्नुयात्।।[6]

कारकांशाद् द्वादशे भावे यदि उच्च राशौ कोऽपि ग्रहः भवेत्तदा तस्य जातकस्य सद्गतिः शुभलोकं च प्राप्तिर्भवति।

कारकांशाद् व्यये केतौ शुभरवेटैर्युतेक्षिते।
तदापि जायते मुक्तिः सायुज्यपदमाप्नुयात्।।[7]

यस्य जातकस्य कारकांशाद द्वादश भावस्थः केतुः भवेत, शुभग्रहेणयुतःदृष्टश्चवा भवेत्तदापि मुक्तिर्भवति। स्वर्गप्राप्तिश्च जातकस्य भवति।

मेषेऽथवाऽपि कोदण्डे कारकांशाद् व्यये शिखी।
शुभग्रहेण संदृष्टे कैवल्यपदमाप्नुयात्।।[8]

यस्य जातकस्य जन्मकुण्डल्यां कारकांशाद् द्वादशभावेमेषवा धनुराशौ केतुः स्थितः भवेत्, शुभग्रहेण दृष्टः यदि भवेत्तदा मोक्षः प्राप्तिर्भवति।

केवलेऽपि व्यये केतुः पापग्रह युतेक्षिते।
न मुक्तिर्जायते तस्य शुभलोकं न पश्यति।।[9]

यस्य जातकस्य जन्मपत्र्यां केवलं द्वादशभावस्थः केतुः भवेत, पापग्रहेण युतदृष्टिश्च यदि भवेत्तदा तस्य जातकस्य मुक्तिर्न भवति। स्वर्गोऽपि न भवति।

पापर्क्षेऽपि द्वादशे राशौ पापर्क्षे पापसंयुते।
तदापि क्षुद्रदेवस्य भक्तिर्भवति निश्चितम्।।[10]
पापर्क्षेऽपि व्यये शुक्रस्तदाऽपि क्षुद्रसेवकः
कारकान्न्यून भागोहि आमात्यो जायतेनरः।।

यस्य जातकस्य जन्मकुण्डल्यां द्वादशेभावे पापग्रहराशौ शुक्रः स्थितः भवेत्तदापि क्षुद्रदेवस्य सेवकः भवति। आत्मकारकाद् न्यूनांशयुतः जातकः अमात्यकारकः भवति।

अमात्यात् द्वादशेराशौ पापर्क्षे पापसंयुते।
अमात्यात् क्षुद्रदेवस्य भक्तिर्भवति निश्चितम्।।[11]

अमात्यस्थानात् द्वादशे भावे पापग्रहराशिः यदि पापयुतः पाप दृष्टिश्च भवेत्तदा जातकः क्षुद्रदेवस्योपासकः भवति।।
दरिद्र योगाध्याये महर्षि पराशरेर्वचनं यथा –

लग्नेशेवै रिष्फगते रिष्फेशे लग्नभागते।
मारकेशयुते दृष्टे जातस्या न्निर्धनः पुमान्।।[12]

यदि जन्मलग्नेशः द्वादशभावस्थः भवेत्, व्ययेश लग्नगत भवेत् मारकेशेन युतदृष्टश्च यदि भवेत्तदा मनुष्यः निर्धनः भवति।

षष्ठाष्टमव्ययगते लग्नेशे पापसंयुते।
मारकेशयुते दृष्टे राजवंशोऽपि निर्धनः।।[13]

लग्नेशः यदि पापग्रहेण युतः सन् 6, 8, 12, भावेष्वन्यतमे स्थितः भवेत्, मारकेशेन युतदृष्टश्चेत् राजबालकोऽपि निर्धनः भवति।

विलग्ननाथेऽरि विनाशरिष्फनाथेन युक्तो यदि पापदृष्टे।
मित्रात्मजेनाथ युतेऽपि दृष्टे शुभैर्न दृष्टे स भवेद्दरिद्रः।।[14]

लग्नेशः यदि 6,8,12 भावानां नाथेनयुतः भवेत्, पापग्रहेण दृष्टः सन् शनिना सहोऽपि युतः भवेत् तथा शुभग्रहेणादृष्टः भवेत्तदा मनुष्य दरिद्रः भवति।

**संदर्भाः**


1. वृ. पा.हो.शा.अ. 16. श्लो. 245
2. वृ. पा.हो.शा.अ. 16. श्लो. 246
3. वृ. पा.हो.शा.अ. 16. श्लो. 247
4. वृ.पा.हो.शा.अ.16,श्लो. 248
5. वृ.पा.हो.शा.अ.16,श्लो. 249
6. वृ. पा. हो. शा. अ. 12. श्लो. 72
7. वृ. पा. हो. शा. अ. 12 श्लो. 73
8. वृ. पा. हो. शा. अ. 12 श्लो. 74
9. वृ. पा. हो. शा. अ. 12 श्लो. 75
10. वृ. पा. हो. शा. अ. 12 श्लो. 81–82
11. वृ. पा. हो. शा. अ. 12 श्लो. 83
12. वृ. पा. हो. शा. अ. 24 श्लो.।
13. वृ. पा. हो. शा. अ. 24, श्लो. 4
14. वृ. पा. हो. शा. अ. 24, श्लो. 5